# आदर्शप्रश्नपत्रम् (2023-24)

**कक्षा - नवमी** **कोड न. - 049**

रोल नं० | | | | | |

# संस्कृतम्

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 15 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :–**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 10 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 20 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

Download from www.MsEducationTv.com

# खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत –

अस्माकं देशे अनेकानि राज्यानि सन्ति। तेषु हरियाणाराज्यम् अति लघुराज्यं वर्तते। अस्य उदयः 1966 तमे वर्षे नवम्बरमासस्य प्रथमे दिनाङ्के अभवत्। हरियाणाप्रदेशः वीराणां भूमिः कथ्यते। अस्य कुरुक्षेत्रे नगरे महाभारतस्य युद्धम् अभवत्। श्रीकृष्णः अर्जुनाय गीतायाः उपदेशम् अत्रैव अयच्छत्। इदं राज्यं कृषिप्रधानं राज्यम् अस्ति। अस्य भूमिः अति उर्वरा अस्ति। अस्य कृषकाः अतीव परिश्रमं कुर्वन्ति। जनाः साधारणं जीवनं व्यतीतं कुर्वन्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) अस्माकं देशे अनेकानि कानि सन्ति?
(ख) कः वीराणां भूमिः कथ्यते?
(ग) हरियाणाराज्यस्य कस्मिन् नगरे महाभारतस्य युद्धम् अभवत्?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) हरियाणाराज्यं कीदृशं राज्यं वर्तते?
(ख) कुरुक्षेत्रे किम् अभवत्?
(ग) अस्य कृषकाः किं कुर्वन्ति?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(क) 'अत्रैव' अस्य पदस्य सन्धिविच्छेदपदं किम्?
(i) अत्रा+एव (ii) अत्र+एव
(iii) अ+त्रैव (iv) अत+रेव

(ख) 'कुर्वन्ति' पदे कः लकारः?
(i) लृट् लकारः (ii) लोट् लकारः
(iii) लट् लकारः (iv) विधिलिङ्ग लकारः

(ग) 'लघुराज्यं' अत्र विशेषणपदं किम् अस्ति?
(i) लघुराज्यम् (ii) राज्यम्
(iii) लाघु (iv) लघु

(घ) 'जनाः' अस्मिन् पदे का विभक्तिः अस्ति?
(i) चतुर्थी (ii) द्वितीया
(iii) तृतीया (iv) प्रथमा

# खण्डः 'ख'

# रचनात्मक-कार्यम्

Download from www.MsEducationTv.com

2. (क) भवतः नाम सुरेशः। स्वमित्रं रमेशं प्रति विद्यालयस्य वार्षिकोत्सवविषये लिखितं प्रदत्तपत्रं पठित्वा मंजूषातः पदानि चित्वा उत्तरपुस्तिकायां लिखत। 5×1=5

परीक्षाभवनम्
तिथिः - 22.03.2023

प्रिय मित्र रमेश,
सप्रेम नमस्ते।
अत्र कुशलं (1) .................. । अहं स्वविद्यालयस्य (2) .................. वर्णयामि। उत्सवस्य अवसरे अस्माकं विद्यालयः (3 ) ................ भूषितः आसीत्। शिक्षानिदेशकः कार्यक्रमस्य (4) ..................... आसीत्। सः कार्यक्रमम् (5) ................ प्रशंसते। गृहे सर्वेभ्यो मम प्रणामः।

भवतः मित्रम्,
सुरेशः।

**मञ्जूषा**

| मुख्यातिथिः, अतीव, वार्षिकोत्सवं, तत्रास्तु, वधूरिव |
|---|

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 5×1=5



i. अत्र एकः बालकः .......... सह आगतः।
ii. अस्मिन् चित्रे एकः .......... अस्ति।
iii. राजमार्गे ............. कारयानम् अपि गच्छति।
iv. कारयानम् ............. क्षिपति।
v. माता .............. स्निह्यति।

**मञ्जूषा**

| एकं ,पुत्रे ,धूम्रं ,मात्रा, वृक्षः |
|---|

## खण्डः 'ग'

Download from www.MsEducationTv.com

# पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

(क) सूर्योदयात् पूर्वमेव सा तत्रोपस्थिता। वृक्षस्योपरि विलोक्य सा आश्चर्यचकिता सञ्जाता यत्तत्र स्वर्णमयः प्रासादो वर्तते। यदा काकः शयित्वा प्रबुद्धः तदा तेन स्वर्णगवाक्षात् कथितं हंहो बाले! तिष्ठ, अहं त्वत्कृते सोपानमवतारयामि, तत्कथय स्वर्णमयं रजतमयमुत ताम्रमयं वा? कन्या प्रावोचत्, "अहं निर्धनमातुर्दुहिता अस्मि। ताम्रसोपानेनैव आगमिष्यामि।" परं स्वर्णसोपानेन सा स्वर्ण-भवनम् आससाद।

**अथवा**

(ख) तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्ठिनमुवाच- "भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।" स आह- "भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

(क) गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः,
समुद्रमासाद्य भवन्त्यपेयाः।।

**अथवा**

(ख) वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
न चाप्यादाय कुशली वैदेही मे गमिष्यसि।।

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) लुब्धया बालिकया लोभस्य फलं प्राप्तम्।

(ख) गुणेष्वेव हि कर्तव्यः प्रयत्नः षुरुषैः सदा।

(ग) आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।

**अन्वयः :-**

सर्वे 1) ........................ प्रियवाक्यप्रदानेन 2) .......................... । तस्मात् तद् एव 3) ........................ वचने का 4) .....................................।

**मञ्जूषा**

| तुष्यन्ति, वक्तव्यं, जन्तवः, दरिद्रता |
|---|

Download from www.MsEducationTv.com

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः तर्पयति च सुखसाधनैः। पृथ्वी जलं तेजो वायुः आकाशश्च अस्याः प्रमुखानि तत्त्वानि। तानि एव मिलित्वा अस्माकं पर्यावरणं रचयन्ति।

**प्रश्नाः :-**

(क) प्रकृतिः केषां संरक्षणाय यतते?
(ख) प्रकृतिः सर्वान् कैः तर्पयति?
(ग) प्रमुखानि तत्त्वानि मिलित्वा अस्माकं किं रचयन्ति?
(घ) का सर्वान् तर्पयति?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) 2×1=2

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्तस्तु हतो हतः ।।

**प्रश्नाः :-**

(क) यत्नेन किं संरक्षेत्?

(ख) किम् एति च याति च?

(ग) कस्मात् क्षीणः अक्षीणो भवति?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) <u>वृक्षकर्तनात्</u> शुद्धवायुः न प्राप्यते। (कस्मै / कस्मात्)

(ख) प्रकृतिः <u>जीवनसुखं</u> प्रददाति। (किम् / काम्)

(ग) <u>स्वर्णकाकं</u> निवारयन्ती बालिका प्रार्थयत्। (कम् / काः)

(घ) मल्लिका <u>सखीभिः</u> सह धर्मयात्रायै गच्छति स्म। (कया / काभिः)

(ङ) मोदकानि <u>पूजानिमित्तानि</u> रचितानि आसन्। (कानि / तानि)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-1'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) स्वरसन्धेः अथवा यण् सन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) अव्ययीभावसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

Download from www.MsEducationTv.com

(ग) कर्ताकारकस्य अथवा करणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'राम' शब्दस्य तृतीया-एकवचने।

ख. 'बालक' शब्दस्य प्रथमा-बहुवचने।

ग. 'लता' शब्दस्य सप्तमी-बहुवचने।

घ. 'किम्' (पु.) शब्दस्य पञ्चमी-बहुवचने।

ङ. 'अस्मद्' शब्दस्य प्रथमा-एकवचने।

च. 'राम' शब्दस्य षष्ठी-बहुवचने।

12. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'पठ्' धातोः लोट्लकारस्य मध्यमपुरुष-एकवचने।

ख. 'लिख्' धातोः लट्लकारस्य प्रथमपुरुष-एकवचने।

ग. 'गम्' धातोः लृट्लकारस्य उत्तमपुरुष-बहुवचने।

घ. 'भू' धातोः लोट्लकारस्य प्रथमपुरुष-द्विवचने।

ङ. 'पा' ( पिब् ) धातोः लट्लकारस्य प्रथमपुरुष-एकवचने।

च. 'सेव्' धातोः लट्लकारस्य प्रथमपुरुष-द्विवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. सीता ................ सह वनं गच्छति। (रामात् , रामेण)

ख. रामः ............. काणः अस्ति। (नेत्राभ्याम् , नेत्रेण)

ग. माता .................. कुप्यति। (पुत्रम् , पुत्राय)

घ. ............. परितः वृक्षाः सन्ति। (ग्रामात् , ग्रामं)

ङ. अलम् ...................। (कोलाहलम् , कोलाहलेन)

14. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

क. प्रभवति ख. उपगता ग. निवसन्ति

Download from www.MsEducationTv.com

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

15. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

(क) 'सूर्य + उदयः' इत्यत्र किं सन्धिपदम्?

(i) सूर्युदयः (ii) सूर्योदयः

(iii) सूर्यादय (iv) सुर्योदय

(ख) 'स्वागतम्' इत्यत्र कः सन्धिविच्छेदः?

(i) स्व+आगतम् (ii) सवा+गतम्

(iii) सु+आगतम् (iv) स्व+गतं

(ग) 'मातापितरौ' इत्यस्मिन् पदे कः समासः?

(i) द्विगुः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) द्वन्द्वः

(घ) 'धर्माधिकारी' इत्यस्य पदस्य विग्रहपदं किम्?

(i) धरम अधिकारी (ii) धरमा अधिकारि

(iii) धर्मस्य अधिकारी (iv) धर्मम् अधिकारी

(ङ) 'आर्यः' इत्यस्य पदस्य विलोमपदं किम्?

(i) आर्या (ii) नार्या

(iii) अनार्यः (iv) अर्या

(च) 'हसितुम्' इत्यस्य पदस्य विलोमपदम् किम्?

(i) खादितुम् (ii) रोदितुम्

(iii) हसित्वा (iv) रुदित्वा

(छ) 'वृक्षः' इत्यस्य शब्दस्य पर्यायपदं किम्?

Download from www.MsEducationTv.com

(i) गगनः (ii) पत्रम्

(iii) तरुः (iv) पृथ्वीम्

(ज) 'आम्रम्' इत्यस्य पदस्य पर्यायपदं किम्?

(i) अलीनाम् (ii) फलम्

(iii) नारिकेलम् (iv) रसालम्

(झ) 'वह् + तुमुन्' इत्यस्य संयोगे किं रूपम्?

(i) वहतुम् (ii) वोहतुम्

(iii) वोढुम् (iv) वोडुम्

(ञ) 'दृष्ट्वा' इत्यस्मिन् पदे कः प्रत्ययः?

(i) क्त्वा (ii) शतृ

(iii) शानच् (iv) तुमुन्

(ट) 'एकोनपंचाशत्' इत्यस्मिन् पदे का संख्या?

(i) 95 (ii) 59

(iii) 49 (iv) 69

(ठ) '30' अङ्कस्थाने किं संख्यावाचीपदम्?

(i) त्रिंशतिः (ii) त्रींशत्

(iii) त्रीशत् (iv) त्रिंशत्

(ड) हितैषिभिः मन्त्रिभिः' अत्र किं विशेष्यपदम्?

(i) मात्रिभिः (ii) मैन्त्रिभि

(iii) मन्त्रिभिः (iv) हितैषिभिः

(ढ) अनश्वरः परोपकारः' अत्र किं विशेषणपदम्?


(i) अनश्वरः (ii) परोपकारः

(iii) अनाश्वरम् (iv) आश्वरः

Download from www.MsEducationTv.com

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -


बालकः प्रातः ............. वादने उत्तिष्ठति।



(i) द्वादश (ii) त्रयः

(iii) सप्त (iv) पञ्च

(त) अहं प्रातः ................ भ्रमणाय गच्छामि।



(i) चतुर्वादने (ii) त्रयवादने

(iii) षड्वादने (iv) दशवादने

Download from www.MsEducationTv.com